# श्रीसुरसरस्वतीसभा, श्रृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः 25-08-2019 | अङ्काः - 100

पूर्वाह्णे – 10:00 तः 1:00 पर्यन्तम् | समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि ।

1 पञ्चानाम् एकवाक्येन उत्तरं लिखत । 5

१. वरतन्तुशिष्यः कः ?

२. जनमेजयस्य पुत्रः कः ?

३. भगवतो जन्मकर्मणोः को हेतुः ?

४. हंसं कः जग्राह ?

५. प्रसन्नः ईशः शिवगुरुं स्वप्ने किमुवाच ?

६. गुरुपुत्रः कः?

७. पितुर्गृहे वर्तमाना कुन्ती कं महर्षिं पर्यचरत् ?

८. सहस्रानीकस्य मन्त्री कः ?

2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत । 10

१. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

२. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः ?

३. ' शङ्कर ' इति नाम कथं सार्थकमासीत् ?

४. गिरिः गुरुसेवां कथं विदधौ ?

५. भगवतः सप्तत्वसम्बन्धं विशदयत।

६. द्रुपदं दृष्ट्वा द्रोणः किमाह ?

७. नीचमध्यमोत्तमाः के ?

Scanned by CamScanner

**3. द्वयोः विस्तरेण उत्तरं लिखत।** **8**

१. रघोरौदार्यं विशदयत।

२. द्रौपद्याः पूर्ववृत्तान्तं वर्णयत।

३. वाल्मीकिकृतचन्द्रोदयवर्णनं कुरुत।

४. हस्तामलकस्य पूर्ववृत्तं वर्णयत।

**4 .वाक्यत्रयं सप्रसङ्गं विवृणुत।** **9**

१. 'शीर्षेऽस्य व्यरचि रयेण पुष्पवृष्टिः '

२. ' अद्वैतमेव तत्त्वं व्यञ्जयद्विधेहि प्रथमं स्वतन्तमेकं ग्रन्थरत्नम् '

३. ' हिंस्रस्य दमनाय हि राज्ञां शस्त्रं न तु कृपणजनक्लेशाय '

४. ' मयि घोषवती नाम वीणाऽस्ति '

५. ' लोकवृत्तसाक्षिणो देवाः पुण्यश्लोकं मे पतिं दिशन्तु '

**5. द्वयोः भावं विशदयत।** **8**

१. साफल्यं कृततपसो विधातुकामः सद्विप्रान् बहुरुचि भोजयाञ्चकार।
सद्भक्त्या तदशितशेषभोक्तृभर्तुः शिष्टं साऽन्वशितवती दधार गर्भम्॥

२. त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम्॥

३. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च॥

**6. श्लोकं पूर्णं लिखत।** **4**

१. व्याघ्रीव तिष्ठति ____________________ चित्रम्।

२. यः प्रीणयेत् ____________________ लभन्ते।

Scanned by CamScanner

**7. एकस्य कवेः देश-काल-कृति-महत्त्वमधिकृत्य लिखत ।** **4**

१. कालिदासः २. लक्ष्मणसूरिः

**8. एकस्य लघुटिप्पणीं लिखत ।** **4**

१. मृगावतीवियोगः २. कौरवाणां जन्म

**9. चत्वारि पदानि वाक्ये योजयत ।** **4**

१. तुण्डेन २. वीक्ष्य ३. मन्वानः ४. अहर्निशम् ५. निर्वापणाय

**10. चतुर्णां रूपाणि विवेचयत ।** **4**

१. जज्ञे २. हैडिम्बेयः ३. पुत्रीयन् ४. कवची ५. मारितः

**11. चतुर्णां पर्यायपदानि लिखत ।** **4**

१. धूमकेतुः २. जाम्बूनदम् ३. संख्यावान् ४. ओघः ५. आक्रीडः

**12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. शूलपाणिः २. पद्मनली ३. अपुत्रः
४. यथाकालम् ५. विभाण्डकमुनिसूनुः

**13. चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. सृजस्यात्मानम् २. जन्तूंस्तस्मिन् ३. सैवेयं
४. पर्यटन्नटवीमध्यगतम् ५. उत्कण्ठितास्ते

**14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. ददर्श २. आह ३. अपृच्छत् ४. मन्येत

**15. द्वयोः व्याकरणविशेषं ससूत्रं लिखत ।** **4**

१. स्वस्त्यस्तु ते २. व्यजयत ३. नरकात् त्रायते

Scanned by CamScanner

**16. समासमेकं सलक्ष्णं सोदाहरणं विशदयत ।** **4**

१. अव्ययीभावः २. द्विगु –समासः

**17. चतुर्थं पदं लिखत ।** **4**

१. कुन्तीं - पाण्डुः :: गान्धारी ________

२. उदयनचरितम् - अनन्ताचार्यः :: श्रृङ्गेरीनिवासः ________

३. रामकृष्णौ – द्वन्द्वः :: पूर्वोत्तरा ________

४. ब्रह्मस्तुतिः – कुमारसम्भवम् :: विष्णुस्तुतिः ________

**18. इतरवचनानि लिखत ।** **4**

१. ______ दूर्वाससौ ______

२. अश्वत्थामा ______ ______

३. ब्रह्म (नपुं) ______ ______

४. ______ ______ विदुषः

**19. रिक्तस्थानानि पूरयत ।** **4**

१. विद्या ________ पूज्यते ।

२. ________ हि निसर्गसिद्धा हि निपुणता ।

३. प्रायः उत्तरपदार्थप्रधानः ________ ।

४. ________ कृष्णायाः पार्थसारथये नमः ।

**20. प्रयोगपरिवर्तनं कुरुत ।** **2**

१. पित्रा शूश्रूषार्थमहं नियोजिता ।

२. धृतराष्ट्रः गाङ्गेयेन अनुमतः राज्यमकरोत् ।

-----------------------------

Scanned by CamScanner

# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

## द्वितीयपत्रिका

**दिनाङ्कः – 25-08-2019** **अङ्काः - 50**

**अपराह्णे –1:30 तः 3:00 पर्यन्तम्** **समयः – सार्धैकहोरा**

**सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि ।**

**1. विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. श्रीशङ्कराचार्यः २. रामायणम् ३. शृङ्गेरी

2. (अ) षष्ठी- विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) तिङ् प्रत्ययाः कति सन्ति ? तिङ् प्रत्ययान् लिखत । तेषां प्रत्ययनां तिङ् इति नाम कथं संगच्छते ? क्रियापदस्य अपरं नाम किम् ? 4

3. (अ) श्लेषालङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) " **प्रियेषु सौभाग्यफला हि चारुता** " एतस्य वृत्तं सलक्षणं सप्रस्तारं च निरूपयत । 4

**4 उत्तरं लिखत । ( त्रयाणामेव )** 3

१. यमकालङ्कारस्य उदाहरणं लिखत ।
२. सति-सप्तमी-प्रयोगस्य उदाहरणवाक्यमेकं लिखत ।
३. प्रश्नचिह्नम् कदा उपयुज्यते ?
४. 'विवक्षातः कारकाणि भवन्ति' इत्यस्य उदाहरणवाक्यमेकं लिखत ।

**5. द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. बभूव २. अगमत् ३. जीयात् ४. चक्रे

**6 .प्रयोगपरिवर्तनं कुरुत ।** 4

१. सः मां पश्यति । २. विधिवशात् प्राप्तेन सन्तुष्यताम् ।

३. मृगैः त्रस्येत । ४. त्वमक्रिडः ।

Scanned by CamScanner

**7. वाक्यदोषं परिहरत ।** 4

१. भीमः बकेन अलम् ।
२. हरिः वैकुण्ठे अधिशेते ।
३. नार्यः पुष्पाणि स्पृहयति ।
४. राजा कष्टं रक्षति ।

**8 . टिप्पणीं लिखत । (एकस्य)** 2

१. भावे प्रयोगः २. लुङ्लकारः

**9 . मातृभाषया अनुवदत ।** 5

१. श्रुतं मया यत्त्वं वाराणसीं ययाथ ।
२. कः खलु नाम प्रवचनसमये शब्दमकरिष्यत् ।
३. धिक् त्वाम्, न वेदमधीषे, न च सन्ध्यामाचरसि ।
४. विद्यार्जनाय यतिषीध्वम् ।
५. छात्राणां चैत्रः बुद्धिमान् ।

**10 . संस्कृतभाषया परिवर्तयत ।** **5**

1. ಕೀಟಗಳಲ್ಲಿ ಜೇನುನೊಣ ಹೆಚ್ಚು ಉಪಕಾರಿ.

   Among the insects bee is most helpful.

2. ಕೌಸಲ್ಯೆ ಬರಲಾಗಿ ಸೀತೆ ಎದ್ದು ನಿಂತುಕೊಂಡಳು.

   Seetha stood up as Kousalya came.

3. ಒಳ್ಳೆಯ ಮಳೆ ಆಗಿದ್ದರೆ, ದೇಶವು ಸುಭಿಕ್ಷವಾಗುತ್ತಿತ್ತು.

   If it had rained well, then the country would have prospered.

4. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.

   May you all live long.

5. ಬಾಲಕರು ಪಾಠಶಾಲೆಗೆ ಹೊಗಲಿಲ್ಲ.

   Boys did not go to school.

------------

Scanned by CamScanner